श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ सप्तषष्टितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तषष्टितमः सर्गः ॥

## कुम्भकर्णकर्तृकं घोरं युद्धं श्रीरामेण तस्य वधश्च

ते निवृत्ता महाकायाः श्रुत्वाङ्गदवचस्तदा।
नैष्ठिकीं बुद्धिमास्थाय सर्वे सङ्ग्रामकाङ्क्षिणः॥ **6.67.1** ॥

समुदीरितवीर्यास्ते समारोपितविक्रमाः।
पर्यवस्थापिता वाक्यैरङ्गदेन बलीयसा॥ **6.67.2** ॥

प्रयाताश्च गता हर्षं मरणे कृतनिश्चयाः।
चक्रुः सुतुमुलं युद्धं वानरास्त्यक्तजीविताः॥ **6.67.3** ॥

अथ वृक्षान् महाकायाः सानूनि सुमहान्ति च।
वानरास्तूर्णमुद्यम्य कुम्भकर्णमभिद्रवन्॥ **6.67.4** ॥

कुम्भकर्णः सुसङ्क्रुद्धो गदामुद्यम्य वीर्यवान्।
धर्षयन् स महाकायः समन्ताद् व्यक्षिपद् रिपून्॥ **6.67.5** ॥

शतानि सप्त चाष्टौ च सहस्राणि च वानराः।
प्रकीर्णाः शेरते भूमौ कुम्भकर्णेन ताडिताः॥ **6.67.6** ॥

षोडशाष्टौ च दश च विंशत्रिंशत्तथैव च।
परिक्षिप्य च बाहुभ्यां खादन् स परिधावति।
भक्षयन् भृशसङ्क्रुद्धो गरुडः पन्नगानिव॥ **6.67.7** ॥

कृच्छ्रेण च समाश्वस्ताः सङ्गम्य च ततस्ततः।
वृक्षाद्रिहस्ता हरयस्तस्थुः सङ्ग्राममूर्धनि ॥ **6.67.8** ॥

ततः पर्वतमुत्पाट्य द्विविदः प्लवगर्षभः।
दुद्राव गिरिशृङ्गाभं विलम्ब इव तोयदः ॥ **6.67.9** ॥

तं समुत्पाट्य चिक्षेप कुम्भकर्णाय वानरः।
तमप्राप्य महाकायं तस्य सैन्येऽपतत् ततः ॥ **6.67.10** ॥

ममर्दाश्वान् गजांश्चापि रथांश्चापि गजोत्तमान्।
तानि चान्यानि रक्षांसि एवं चान्यद्गिरेः शिरः ॥ **6.67.11** ॥

तच्छैलवेगाभिहतं हताश्वं हतसारथिम्।
रक्षसां रुधिरक्लिन्नं बभूवायोधनं महत् ॥ **6.67.12** ॥

रथिनो वानरेन्द्राणां शरैः कालान्तकोपमैः।
शिरांसि नर्दतां जह्रुः सहसा भीमनिःस्वनाः ॥ **6.67.13** ॥

वानराश्च महात्मानः समुत्पाट्य महाद्रुमान्।
रथानश्वान् गजानुष्ट्रान् राक्षसानभ्यसूदयन् ॥ **6.67.14** ॥

हनूमाञ्शैलशृङ्गाणि शिलाश्च विविधान् द्रुमान्।
ववर्ष कुम्भकर्णस्य शिरस्यम्बरमास्थितः ॥ **6.67.15** ॥

तानि पर्वतशृङ्गाणि शूलेन स बिभेद ह।
बभञ्ज वृक्षवर्षं च कुम्भकर्णो महाबलः ॥ **6.67.16** ॥

ततो हरीणां तदनीकमुग्रं
    दुद्राव शूलं निशितं प्रगृह्य।
तस्थौ स तस्यापततः परस्ता -
    न्महीधराग्रं हनुमान् प्रगृह्य ॥ **6.67.17** ॥

स कुम्भकर्णं कुपितो जघान
    वेगेन शैलोत्तमभीमकायम्।
सञ्चुक्षुभे तेन तदाभिभूतो
    मेदार्द्रगात्रो रुधिरावसिक्तः॥ **6.67.18** ॥

स शूलमाविध्य तडित्प्रकाशं
    गिरिं यथा प्रज्वलिताग्निशृङ्गम्।
बाह्वन्तरे मारुतिमाजघान
    गुहोऽचलं क्रौञ्चमिवोग्रशक्त्या॥ **6.67.19** ॥

स शूलनिर्भिन्नमहाभुजान्तरः
    प्रविह्वलः शोणितमुद्वमन् मुखात्।
ननाद भीमं हनुमान् महाहवे
    युगान्तमेघस्तनितस्वनोपमम्॥ **6.67.20** ॥

ततो विनेदुः सहसा प्रहृष्टा
    रक्षोगणास्तं व्यथितं समीक्ष्य।
प्लवङ्गमास्तु व्यथिता भयार्ताः
    प्रदुद्रुवुः संयति कुम्भकर्णात्॥ **6.67.21** ॥

ततस्तु नीलो बलवान् पर्यवस्थापयन् बलम्।
प्रविचिक्षेप शैलाग्रं कुम्भकर्णाय धीमते॥ **6.67.22** ॥

तदापतन्तं सम्प्रेक्ष्य मुष्टिनाभिजघान ह।
मुष्टिप्रहाराभिहतं तच्छैलाग्रं व्यशीर्यत।
सविस्फुलिङ्गं सज्वालं निपपात महीतले॥ **6.67.23** ॥

ऋषभः शरभो नीलो गवाक्षो गन्धमादनः।
पञ्च वानरशार्दूलाः कुम्भकर्णमुपाद्रवन्॥ **6.67.24** ॥

शैलैर्वृक्षैस्तलैः पादैर्मुष्टिभिश्च महाबलाः।
कुम्भकर्णं महाकायं निजघ्नुः सर्वतो युधि ॥ **6.67.25** ॥

स्पर्शानिव प्रहारांस्तान् वेदयानो न विव्यथे।
ऋषभं तु महावेगं बाहुभ्यां परिषस्वजे ॥ **6.67.26** ॥

कुम्भकर्णभुजाभ्यां तु पीडितो वानरर्षभः।
निपपातर्षभो भीमः प्रमुखागतशोणितः ॥ **6.67.27** ॥

मुष्टिना शरभं हत्वा जानुना नीलमाहवे।
आजघान गवाक्षं तु तलेनेन्द्ररिपुस्तदा।
पादेनाभ्यहनत् क्रुद्धस्तरसा गन्धमादनम् ॥ **6.67.28** ॥

दत्तप्रहारव्यथिता मुमुहुः शोणितोक्षिताः।
निपेतुस्ते तु मेदिन्यां निकृत्ता इव किंशुकाः ॥ **6.67.29** ॥

तेषु वानरमुख्येषु पातितेषु महात्मसु।
वानराणां सहस्राणि कुम्भकर्णं प्रदुद्रुवुः ॥ **6.67.30** ॥

तं शैलमिव शैलाभाः सर्वे तु प्लवगर्षभाः।
समारुह्य समुत्पत्य ददंशुश्च महाबलाः ॥ **6.67.31** ॥

तं नखैर्दशनैश्चापि मुष्टिभिर्बाहुभिस्तथा।
कुम्भकर्णं महाबाहुं निजघ्नुः प्लवगर्षभाः ॥ **6.67.32** ॥

स वानरसहस्रैस्तु विचितः पर्वतोपमः।
रराज राक्षसव्याघ्रो गिरिरात्मरुहैरिव ॥ **6.67.33** ॥

बाहुभ्यां वानरान् सर्वान् प्रगृह्य स महाबलः।
भक्षयामास सङ्क्रुद्धो गरुडः पन्नगानिव ॥ **6.67.34** ॥

प्रक्षिप्ताः कुम्भकर्णेन वक्त्रे पातालसन्निभे।
नासापुटाभ्यां सञ्जग्मुः कर्णाभ्यां चैव वानराः॥ **6.67.35** ॥

भक्षयन् भृशसङ्क्रुद्धो हरीन् पर्वतसन्निभः।
बभञ्ज वानरान् सर्वान् सङ्क्रुद्धो राक्षसोत्तमः॥ **6.67.36** ॥

मांसशोणितसङ्क्लेदां कुर्वन् भूमिं स राक्षसः।
चचार हरिसैन्येषु कालाग्निरिव मूर्च्छितः॥ **6.67.37** ॥

वज्रहस्तो यथा शक्रः पाशहस्त इवान्तकः।
शूलहस्तो बभौ युद्धे कुम्भकर्णो महाबलः॥ **6.67.38** ॥

यथा शुष्काण्यरण्यानि ग्रीष्मे दहति पावकः।
तथा वानरसैन्यानि कुम्भकर्णो ददाह सः॥ **6.67.39** ॥

ततस्ते वध्यमानास्तु हतयूथाः प्लवङ्गमाः।
वानरा भयसंविग्ना विनेदुर्विकृतैः स्वरैः॥ **6.67.40** ॥

अनेकशो वध्यमानाः कुम्भकर्णेन वानराः।
राघवं शरणं जग्मुर्व्यथिता भिन्नचेतसः॥ **6.67.41** ॥

प्रभग्नान् वानरान् दृष्ट्वा वज्रहस्तात्मजात्मजः।
अभ्यधावत वेगेन कुम्भकर्णं महाहवे॥ **6.67.42** ॥

शैलशृङ्गं महद् गृह्य विनदन् स मुहुर्मुहुः।
त्रासयन् राक्षसान् सर्वान् कुम्भकर्णपदानुगान्॥ **6.67.43** ॥

चिक्षेप शैलशिखरं कुम्भकर्णस्य मूर्धनि।
स तेनाभिहतो मूर्ध्नि शैलेनेन्द्ररिपुस्तदा॥ **6.67.44** ॥

कुम्भकर्णः प्रजज्वाल क्रोधेन महता तदा।
सोऽभ्यधावत वेगेन वालिपुत्रममर्षणः॥ **6.67.45** ॥

कुम्भकर्णो महानादस्त्रासयन् सर्ववानरान्।
शूलं ससर्ज वै रोषादङ्गदे तु महाबलः॥ **6.67.46** ॥

तदापतन्तं बलवान् युद्धमार्गविशारदः।
लाघवान्मोक्षयामास बलवान् वानरर्षभः॥ **6.67.47** ॥

उत्पत्य चैनं तरसा तलेनोरस्यताडयत्।
स तेनाभिहतः कोपात् प्रमुमोहाचलोपमः॥ **6.67.48** ॥

स लब्धसंज्ञोऽतिबलो मुष्टिं सङ्गृह्य राक्षसः।
अपहस्तेन चिक्षेप विसंज्ञः स पपात ह॥ **6.67.49** ॥

तस्मिन् प्लवगशार्दूले विसंज्ञे पतिते भुवि।
तच्छूलं समुपादाय सुग्रीवमभिदुद्रुवे॥ **6.67.50** ॥

तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णं महाबलम्।
उत्पपात तदा वीरः सुग्रीवो वानराधिपः॥ **6.67.51** ॥

स पर्वताग्रमुत्क्षिप्य समाविध्य महाकपिः।
अभिदुद्राव वेगेन कुम्भकर्णं महाबलम्॥ **6.67.52** ॥

तमापतन्तं सम्प्रेक्ष्य कुम्भकर्णः प्लवङ्गमम्।
तस्थौ विवृत्तसर्वाङ्गो वानरेन्द्रस्य सम्मुखः॥ **6.67.53** ॥

कपिशोणितदिग्धाङ्गं भक्षयन्तं महाकपीन्।
कुम्भकर्णं स्थितं दृष्ट्वा सुग्रीवो वाक्यमब्रवीत्॥ **6.67.54** ॥

पातिताश्च त्वया वीराः कृतं कर्म सुदुष्करम्।
भक्षितानि च सैन्यानि प्राप्तं ते परमं यशः॥ **6.67.55** ॥

त्यज तद् वानरानीकं प्राकृतैः किं करिष्यसि।
सहस्वैकं निपातं मे पर्वतस्यास्य राक्षस ॥ **6.67.56** ॥

तद् वाक्यं हरिराजस्य सत्त्वधैर्यसमन्वितम्।
श्रुत्वा राक्षसशार्दूलः कुम्भकर्णोऽब्रवीद् वचः ॥ **6.67.57** ॥

प्रजापतेस्तु पौत्रस्त्वं तथैवर्क्षरजःसुतः।
धृतिपौरुषसम्पन्नस्तस्माद् गर्जसि वानर ॥ **6.67.58** ॥

स कुम्भकर्णस्य वचो निशम्य
व्याविध्य शैलं सहसा मुमोच।
तेनाजघानोरसि कुम्भकर्णं
शैलेन वज्राशनिसन्निभेन ॥ **6.67.59** ॥

तच्छैलशृङ्गं सहसा विभिन्नं
भुजान्तरे तस्य तदा विशाले।
ततो विषेदुः सहसा प्लवङ्गा
रक्षोगणाश्चापि मुदा विनेदुः ॥ **6.67.60** ॥

स शैलशृङ्गाभिहतश्चुकोप
ननाद रोषाच्च विवृत्य वक्त्रम्।
व्याविध्य शूलं स तडित्प्रकाशं
चिक्षेप हर्यृक्षपतेर्वधाय ॥ **6.67.61** ॥

तत् कुम्भकर्णस्य भुजप्रणुन्नं
शूलं शितं काञ्चनधामयष्टिम्।
क्षिप्रं समुत्पत्य निगृह्य दोर्भ्यां
बभञ्ज वेगेन सुतोऽनिलस्य ॥ **6.67.62** ॥

कृतं भारसहस्रस्य शूलं कालायसं महत्।
बभञ्ज जानुमारोप्य तदा हृष्टः प्लवङ्गमः॥ **6.67.63** ॥

शूलं भग्नं हनुमता दृष्ट्वा वानरवाहिनी।
हृष्टा ननाद बहुशः सर्वतश्चापि दुद्रुवे॥ **6.67.64** ॥

बभूवाथ परित्रस्तो राक्षसो विमुखोऽभवत्।
सिंहनादं च ते चक्रुः प्रहृष्टा वनगोचराः।
मारुतिं पूजयाञ्चक्रुर्दृष्ट्वा शूलं तथागतम्॥ **6.67.65** ॥

स तत् तथा भग्नमवेक्ष्य शूलं
चुकोप रक्षोधिपतिर्महात्मा।
उत्पाट्य लङ्कामलयात् स शृङ्गं
जघान सुग्रीवमुपेत्य तेन॥ **6.67.66** ॥

स शैलशृङ्गाभिहतो विसंज्ञः
पपात भूमौ युधि वानरेन्द्रः।
तं वीक्ष्य भूमौ पतितं विसंज्ञं
नेदुः प्रहृष्टा युधि यातुधानाः॥ **6.67.67** ॥

समभ्युपेत्याद्भुतघोरवीर्यं
स कुम्भकर्णो युधि वानरेन्द्रम्।
जहार सुग्रीवमभिप्रगृह्य
यथानिलो मेघमिव प्रचण्डः॥ **6.67.68** ॥

स तं महामेघनिकाशरूप -
मुत्पाट्य गच्छन् युधि कुम्भकर्णः।
रराज मेरुप्रतिमानरूपो
मेरुर्यथा व्युच्छ्रितघोरशृङ्गः॥ **6.67.69** ॥

ततस्तमादाय जगाम वीरः
    संस्तूयमानो युधि राक्षसेन्द्रः।
शृण्वन् निनादं त्रिदिवालयानां
    प्लवङ्गराजग्रहविस्मितानाम्॥ **6.67.70** ॥

ततस्तमादाय तदा स मेने
    हरीन्द्रमिन्द्रोपममिन्द्रवीर्यः।
अस्मिन् हते सर्वमिदं हतं स्यात्
    सराघवं सैन्यमितीन्द्रशत्रुः॥ **6.67.71** ॥

विद्रुतां वाहिनीं दृष्ट्वा वानराणामितस्ततः।
कुम्भकर्णेन सुग्रीवं गृहीतं चापि वानरम्॥ **6.67.72** ॥

हनूमांश्चिन्तयामास मतिमान् मारुतात्मजः।
एवं गृहीते सुग्रीवे किं कर्तव्यं मया भवेत्॥ **6.67.73** ॥

यद्धि न्याय्यं मया कर्तुं तत् करिष्याम्यसंशयम्।
भूत्वा पर्वतसङ्काशो नाशयिष्यामि राक्षसम्॥ **6.67.74** ॥

मया हते संयति कुम्भकर्णे
    महाबले मुष्टिविशीर्णदेहे।
विमोचिते वानरपार्थिवे च
    भवन्तु हृष्टाः प्लवगाः समग्राः॥ **6.67.75** ॥

अथवा स्वयमप्येष मोक्षं प्राप्स्यति वानरः।
गृहीतोऽयं यदि भवेत् त्रिदशैः सासुरोरगैः॥ **6.67.76** ॥

मन्ये न तावदात्मानं बुध्यते वानराधिपः।
शैलप्रहाराभिहतः कुम्भकर्णेन संयुगे॥ **6.67.77** ॥

अयं मुहूर्तात् सुग्रीवो लब्धसंज्ञो महाहवे।
आत्मनो वानराणां च यत् पथ्यं तत् करिष्यति॥ **6.67.78** ॥

मया तु मोक्षितस्यास्य सुग्रीवस्य महात्मनः।
अप्रीतिश्च भवेत् कष्टा कीर्तिनाशश्च शाश्वतः॥ **6.67.79** ॥

तस्मान्मुहूर्तं काङ्क्षिष्ये विक्रमं मोक्षितस्य तु।
भिन्नं च वानरानीकं तावदाश्वासयाम्यहम्॥ **6.67.80** ॥

इत्येवं चिन्तयित्वाथ हनूमान् मारुतात्मजः।
भूयः संस्तम्भयामास वानराणां महाचमूम्॥ **6.67.81** ॥

स कुम्भकर्णोऽथ विवेश लङ्कां
    स्फुरन्तमादाय महाहरिं तम्।
विमानचर्यागृहगोपुरस्थैः
    पुष्पाग्र्यवर्षैरभिपूज्यमानः॥ **6.67.82** ॥

लाजगन्धोदवर्षैस्तु सेच्यमानः शनैः शनैः।
राजवीथ्यास्तु शीतत्वात् संज्ञां प्राप महाबलः॥ **6.67.83** ॥

ततः स संज्ञामुपलभ्य कृच्छ्राद्
    बलीयसस्तस्य भुजान्तरस्थः।
अवेक्षमाणः पुरराजमार्गं
    विचिन्तयामास मुहुर्महात्मा॥ **6.67.84** ॥

एवं गृहीतेन कथं नु नाम
    शक्यं मया सम्प्रतिकर्तुमद्य।
तथा करिष्यामि यथा हरीणां
    भविष्यतीष्टं च हितं च कार्यम्॥ **6.67.85** ॥

ततः कराग्रैः सहसा समेत्य
राजा हरीणाममरेन्द्रशत्रोः।
खरैश्च कर्णौ दशनैश्च नासां
ददंश पादैर्विददार पार्श्वौ ॥ 6.67.86 ॥

स कुम्भकर्णो हृतकर्णनासो
विदारितस्तेन रदैर्नखैश्च।
रोषाभिभूतः क्षतजार्द्रगात्रः
सुग्रीवमाविध्य पिपेष भूमौ ॥ 6.67.87 ॥

स भूतले भीमबलाभिपिष्टः
सुरारिभिस्तैरभिहन्यमानः।
जगाम खं कन्दुकवज्जवेन
पुनश्च रामेण समाजगाम ॥ 6.67.88 ॥

कर्णनासाविहीनस्तु कुम्भकर्णो महाबलः।
रराज शोणितोत्सिक्तो गिरिः प्रस्रवणैरिव ॥ 6.67.89 ॥

शोणितार्द्रो महाकायो राक्षसो भीमदर्शनः।
युद्धायाभिमुखो भूयो मनश्चक्रे निशाचरः ॥ 6.67.90 ॥

अमर्षाच्छोणितोद्गारी शुशुभे रावणानुजः।
नीलाञ्जनचयप्रख्यः ससन्ध्य इव तोयदः ॥ 6.67.91 ॥

गते च तस्मिन् सुरराजशत्रुः
क्रोधात् प्रदुद्राव रणाय भूयः।
अनायुधोऽस्मीति विचिन्त्य रौद्रो
घोरं तदा मुद्गरमाससाद ॥ 6.67.92 ॥

ततः स पुर्याः सहसा महौजा
　　निष्क्रम्य तद् वानरसैन्यमुग्रम्।
बभक्ष रक्षो युधि कुम्भकर्णः
　　प्रजा युगान्ताग्निरिव प्रवृद्धः॥ **6.67.93** ॥

बुभुक्षितः शोणितमांसगृध्नुः
　　प्रविश्य तद् वानरसैन्यमुग्रम्।
चखाद रक्षांसि हरीन् पिशाचा -
　　न्नृक्षांश्च मोहाद् युधि कुम्भकर्णः।
यथैव मृत्युर्हरते युगान्ते
　　स भक्षयामास हरींश्च मुख्यान्॥ **6.67.94** ॥

एकं द्वौ त्रीन् बहून् क्रुद्धो वानरान् सह राक्षसैः।
समादायैकहस्तेन प्रचिक्षेप त्वरन् मुखे॥ **6.67.95** ॥

सम्प्रस्रवंस्तदा मेदः शोणितं च महाबलः।
वध्यमानो नगेन्द्राग्रैर्भक्षयामास वानरान्॥ **6.67.96** ॥

ते भक्ष्यमाणा हरयो रामं जग्मुस्तदा गतिम्।
कुम्भकर्णो भृशं क्रुद्धः कपीन् खादन् प्रधावति॥ **6.67.97** ॥

शतानि सप्त चाष्टौ च विंशत्त्रिंशत् तथैव च।
सम्परिष्वज्य बाहुभ्यां खादन् विपरिधावति॥ **6.67.98** ॥

मेदोवसाशोणितदिग्धगात्रः
　　कर्णावसक्तग्रथितान्त्रमालः।
ववर्ष शूलानि सुतीक्ष्णदंष्ट्रः
　　कालो युगान्तस्थ इव प्रवृद्धः॥ **6.67.99** ॥

तस्मिन् काले सुमित्रायाः पुत्रः परबलार्दनः।
चकार लक्ष्मणः क्रुद्धो युद्धं परपुरञ्जयः॥ **6.67.100** ॥

स कुम्भकर्णस्य शराञ्शरीरे सप्त वीर्यवान्।
निचखानाददे चान्यान् विससर्ज च लक्ष्मणः॥ **6.67.101** ॥

पीड्यमानस्तदस्त्रं तु विशेषं तत् स राक्षसः।
ततश्चुकोप बलवान् सुमित्रानन्दवर्धनः॥ **6.67.102** ॥

अथास्य कवचं शुभ्रं जाम्बूनदमयं शुभम्।
प्रच्छादयामास शरैः सन्ध्याभ्रमिव मारुतः॥ **6.67.103** ॥

नीलाञ्जनचयप्रख्यः शरैः काञ्चनभूषणैः।
आपीड्यमानः शुशुभे मेघैः सूर्य इवांशुमान्॥ **6.67.104** ॥

ततः स राक्षसो भीमः सुमित्रानन्दवर्धनम्।
सावज्ञमेव प्रोवाच वाक्यं मेघौघनिःस्वनः॥ **6.67.105** ॥

अन्तकस्याप्यकष्टेन युधि जेतारमाहवे।
युध्यता मामभीतेन ख्यापिता वीरता त्वया॥ **6.67.106** ॥

प्रगृहीतायुधस्येह मृत्योरिव महामृधे।
तिष्ठन्नप्यग्रतः पूज्यः किमु युद्धप्रदायकः॥ **6.67.107** ॥

ऐरावतं समारूढो वृतः सर्वामरैः प्रभुः।
नैव शक्रोऽपि समरे स्थितपूर्वः कदाचन॥ **6.67.108** ॥

अद्य त्वयाहं सौमित्रे बालेनापि पराक्रमैः।
तोषितो गन्तुमिच्छामि त्वामनुज्ञाप्य राघवम्॥ **6.67.109** ॥

यत् तु वीर्यबलोत्साहैस्तोषितोऽहं रणे त्वया।
राममेवैकमिच्छामि हन्तुं यस्मिन् हते हतम्॥ **6.67.110** ॥

रामे मयात्र निहते येऽन्ये स्थास्यन्ति संयुगे।
तानहं योधयिष्यामि स्वबलेन प्रमाथिना॥ **6.67.111** ॥

इत्युक्तवाक्यं तद् रक्षः प्रोवाच स्तुतिसंहितम्।
मृधे घोरतरं वाक्यं सौमित्रिः प्रहसन्निव॥ **6.67.112** ॥

यस्त्वं शक्रादिभिर्देवैरसह्यः प्राप्य पौरुषम्।
तत् सत्यं नान्यथा वीर दृष्टस्तेऽद्य पराक्रमः॥ **6.67.113** ॥

एष दाशरथी रामस्तिष्ठत्यद्रिरिवाचलः।
इति श्रुत्वा ह्यनादृत्य लक्ष्मणं स निशाचरः॥ **6.67.114** ॥

अतिक्रम्य च सौमित्रिं कुम्भकर्णो महाबलः।
राममेवाभिदुद्राव कम्पयन्निव मेदिनीम्॥ **6.67.115** ॥

अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन्।
कुम्भकर्णस्य हृदये ससर्ज निशिताञ्शरान्॥ **6.67.116** ॥

तस्य रामेण विद्धस्य सहसाभिप्रधावतः।
अङ्गारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः॥ **6.67.117** ॥

रामास्त्रविद्धो घोरं वै नर्दन् राक्षसपुङ्गवः।
अभ्यधावत सङ्क्रुद्धो हरीन् विद्रावयन् रणे॥ **6.67.118** ॥

तस्योरसि निमग्नास्ते शरा बर्हिणवाससः।
हस्ताच्चास्य परिभ्रष्टा गदा चोर्व्यां पपात ह॥ **6.67.119** ॥

आयुधानि च सर्वाणि विप्रकीर्यन्त भूतले।
स निरायुधमात्मानं यदा मेने महाबलः॥ **6.67.120** ॥

मुष्टिभ्यां च कराभ्यां च चकार कदनं महत्।
स बाणैरतिविद्धाङ्गः क्षतजेन समुक्षितः।
रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा ॥ **6.67.121** ॥

स तीव्रेण च कोपेन रुधिरेण च मूर्च्छितः।
वानरान् राक्षसानृक्षान् खादन् स परिधावति ॥ **6.67.122** ॥

अथ शृङ्गं समाविध्य भीमं भीमपराक्रमः।
चिक्षेप राममुद्दिश्य बलवानन्तकोपमः ॥ **6.67.123** ॥

अप्राप्तमन्तरा रामः सप्तभिस्तमजिह्मगैः।
चिच्छेद गिरिशृङ्गं तं पुनः सन्धाय कार्मुकम् ॥ **6.67.124** ॥

ततस्तु रामो धर्मात्मा तस्य शृङ्गं महत् तदा।
शरैः काञ्चनचित्राङ्गैश्चिच्छेद भरताग्रजः ॥ **6.67.125** ॥

तन्मेरुशिखराकारं द्योतमानमिव श्रिया।
द्वे शते वानराणां च पतमानमपातयत् ॥ **6.67.126** ॥

तस्मिन् काले स धर्मात्मा लक्ष्मणो राममब्रवीत्।
कुम्भकर्णवधे युक्तो योगान् परिमृशन् बहून् ॥ **6.67.127** ॥

नैवायं वानरान् राजन् न विजानाति राक्षसान्।
मत्तः शोणितगन्धेन स्वान् परांश्चैव खादति ॥ **6.67.128** ॥

साध्वेनमधिरोहन्तु सर्वतो वानरर्षभाः।
यूथपाश्च यथा मुख्यास्तिष्ठन्त्वस्मिन् समन्ततः ॥ **6.67.129** ॥

अद्यायं दुर्मतिः काले गुरुभारप्रपीडितः।
प्रचरन् राक्षसो भूमौ नान्यान् हन्यात् प्लवङ्गमान् ॥ **6.67.130** ॥

तस्य तद् वचनं श्रुत्वा राजपुत्रस्य धीमतः।
ते समारुरुहुर्हृष्टाः कुम्भकर्णं महाबलाः॥ **6.67.131** ॥

कुम्भकर्णस्तु सङ्क्रुद्धः समारूढः प्लवङ्गमैः।
व्यधूनयत् तान् वेगेन दुष्टहस्तीव हस्तिपान्॥ **6.67.132** ॥

तान् दृष्ट्वा निर्धुतान् रामो रुष्टोऽयमिति राक्षसम्।
समुत्पपात वेगेन धनुरुत्तममाददे॥ **6.67.133** ॥

क्रोधरक्तेक्षणो धीरो निर्दहन्निव चक्षुषा।
राघवो राक्षसं वेगादभिदुद्राव वेगितः।
यूथपान् हर्षयन् सर्वान् कुम्भकर्णबलार्दितान्॥ **6.67.134** ॥

स चापमादाय भुजङ्गकल्पं
दृढज्यमुग्रं तपनीयचित्रम्।
हरीन् समाश्वास्य समुत्पपात
रामो निबद्धोत्तमतूणबाणः॥ **6.67.135** ॥

स वानरगणैस्तैस्तु वृतः परमदुर्जयैः।
लक्ष्मणानुचरो वीरः सम्प्रतस्थे महाबलः॥ **6.67.136** ॥

स ददर्श महात्मानं किरीटिनमरिन्दमम्।
शोणिताप्लुतरक्ताक्षं कुम्भकर्णं महाबलः॥ **6.67.137** ॥

सर्वान् समभिधावन्तं यथा रुष्टं दिशागजम्।
मार्गमाणं हरीन् क्रुद्धं राक्षसैः परिवारितम्॥ **6.67.138** ॥

विन्ध्यमन्दरसङ्काशं काञ्चनाङ्गदभूषणम्।
स्रवन्तं रुधिरं वक्त्राद् वर्षमेघमिवोत्थितम्॥ **6.67.139** ॥

जिह्वया परिलिह्यन्तं सृक्किणी शोणितोक्षिते।
मृद्नन्तं वानरानीकं कालान्तकयमोपमम्॥ **6.67.140** ॥

तं दृष्ट्वा राक्षसश्रेष्ठं प्रदीप्तानलवर्चसम्।
विस्फारयामास तदा कार्मुकं पुरुषर्षभः॥ **6.67.141** ॥

स तस्य चापनिर्घोषात् कुपितो राक्षसर्षभः।
अमृष्यमाणस्तं घोषमभिदुद्राव राघवम्॥ **6.67.142** ॥

ततस्तु वातोद्धतमेघकल्पं
    भुजङ्गराजोत्तमभोगबाहुः।
तमापतन्तं धरणीधराभ -
    मुवाच रामो युधि कुम्भकर्णम्॥ **6.67.143** ॥

आगच्छ रक्षोऽधिप मा विषाद -
    मवस्थितोऽहं प्रगृहीतचापः।
अवेहि मां शक्रसपत्न रामं
    मया मुहूर्ताद् भविता विचेताः॥ **6.67.144** ॥

रामोऽयमिति विज्ञाय जहास विकृतस्वनम्।
अभ्यधावत सङ्क्रुद्धो हरीन् विद्रावयन् रणे॥ **6.67.145** ॥

दारयन्निव सर्वेषां हृदयानि वनौकसाम्।
प्रहस्य विकृतं भीमं स मेघस्तनितोपमम्॥ **6.67.146** ॥

कुम्भकर्णो महातेजा राघवं वाक्यमब्रवीत्।
नाहं विराधो विज्ञेयो न कबन्धः खरो न च।
न वाली न च मारीचः कुम्भकर्णः समागतः॥ **6.67.147** ॥

पश्य मे मुद्गरं भीमं सर्वं कालायसं महत्।
अनेन निर्जिता देवा दानवाश्च पुरा मया॥ **6.67.148** ॥

विकर्णनास इति मां नावज्ञातुं त्वमर्हसि।
स्वल्पापि हि न मे पीडा कर्णनासाविनाशनात्॥ **6.67.149** ॥

दर्शयेक्ष्वाकुशार्दूल वीर्यं गात्रेषु मेऽनघ।
ततस्त्वां भक्षयिष्यामि दृष्टपौरुषविक्रमम्॥ **6.67.150** ॥

स कुम्भकर्णस्य वचो निशम्य
    रामः सुपुङ्खान् विससर्ज बाणान्।
तैराहतो वज्रसमप्रवेगै -
    र्न चुक्षुभे न व्यथते सुरारिः॥ **6.67.151** ॥

यैः सायकैः सालवरा निकृत्ता
    वाली हतो वानरपुङ्गवश्च।
ते कुम्भकर्णस्य तदा शरीरं
    वज्रोपमा न व्यथयाम्प्रचक्रुः॥ **6.67.152** ॥

स वारिधारा इव सायकांस्तान्
    पिबञ्शरीरेण महेन्द्रशत्रुः।
जघान रामस्य शरप्रवेगं
    व्याविध्य तं मुद्गरमुग्रवेगम्॥ **6.67.153** ॥

ततस्तु रक्षः क्षतजानुलिप्तं
    वित्रासनं देवमहाचमूनाम्।
व्याविध्य तं मुद्गरमुग्रवेगं
    विद्रावयामास चमूं हरीणाम्॥ **6.67.154** ॥

वायव्यमादाय ततोऽपरास्त्रं
रामः प्रचिक्षेप निशाचराय।
समुद्गरं तेन जहार बाहुं
स कृत्तबाहुस्तुमुलं ननाद ॥ **6.67.155** ॥

स तस्य बाहुर्गिरिशृङ्गकल्पः
समुद्गरो राघवबाणकृत्तः।
पपात तस्मिन् हरिराजसैन्ये
जघान तां वानरवाहिनीं च ॥ **6.67.156** ॥

ते वानरा भग्नहतावशेषाः
पर्यन्तमाश्रित्य तदा विषण्णाः।
प्रपीडिताङ्गा ददृशुः सुघोरं
नरेन्द्ररक्षोऽधिपसन्निपातम् ॥ **6.67.157** ॥

स कुम्भकर्णोऽस्त्रनिकृत्तबाहु -
र्महासिकृत्ताग्र इवाचलेन्द्रः।
उत्पाटयामास करेण वृक्षं
ततोऽभिदुद्राव रणे नरेन्द्रम् ॥ **6.67.158** ॥

तं तस्य बाहुं सहतालवृक्षं
समुद्यतं पन्नगभोगकल्पम्।
ऐन्द्रास्त्रयुक्तेन जघान रामो
बाणेन जाम्बूनदचित्रितेन ॥ **6.67.159** ॥

स कुम्भकर्णस्य भुजो निकृत्तः
पपात भूमौ गिरिसन्निकाशः।
विचेष्टमानो निजघान वृक्षा -
ञ्छैलाञ्छिलावानरराक्षसांश्च ॥ **6.67.160** ॥

तं छिन्नबाहुं समवेक्ष्य रामः
समापतन्तं सहसा नदन्तम्।
द्वावर्धचन्द्रौ निशितौ प्रगृह्य
चिच्छेद पादौ युधि राक्षसस्य॥ **6.67.161** ॥

तौ तस्य पादौ प्रदिशो दिशश्च
गिरेर्गुहाश्चैव महार्णवं च।
लङ्कां च सेनां कपिराक्षसानां
विनादयन्तौ विनिपेततुश्च॥ **6.67.162** ॥

निकृत्तबाहुर्विनिकृत्तपादो
विदार्य वक्त्रं वडवामुखाभम्।
दुद्राव रामं सहसाभिगर्जन्
राहुर्यथा चन्द्रमिवान्तरिक्षे॥ **6.67.163** ॥

अपूरयत् तस्य मुखं शिताग्रै
रामः शरैर्हेमपिनद्धपुङ्खैः।
सम्पूर्णवक्त्रो न शशाक वक्तुं
चुकूज कृच्छ्रेण मुमूर्च्छ चापि॥ **6.67.164** ॥

अथाददे सूर्यमरीचिकल्पं
स ब्रह्मदण्डान्तककालकल्पम्।
अरिष्टमैन्द्रं निशितं सुपुङ्खं
रामः शरं मारुततुल्यवेगम्॥ **6.67.165** ॥

तं वज्रजाम्बूनदचारुपुङ्खं
प्रदीप्तसूर्यज्वलनप्रकाशम्।
महेन्द्रवज्राशनितुल्यवेगं
रामः प्रचिक्षेप निशाचराय॥ **6.67.166** ॥

स सायको राघवबाहुचोदितो
दिशःस्वभासा दश सम्प्रकाशयन्।
विधूमवैश्वानरभीमदर्शनो
जगाम शक्राशनिभीमविक्रमः॥ **6.67.167** ॥

स तन्महापर्वतकूटसन्निभं
सुवृत्तदंष्ट्रं चलचारुकुण्डलम्।
चकर्त रक्षोऽधिपतेः शिरस्तदा
यथैव वृत्रस्य पुरा पुरन्दरः॥ **6.67.168** ॥

कुम्भकर्णशिरो भाति कुण्डलालङ्कृतं महत्।
आदित्येऽभ्युदिते रात्रौ मध्यस्थ इव चन्द्रमाः॥ **6.67.169** ॥

तद् रामबाणाभिहतं पपात
रक्षःशिरः पर्वतसन्निकाशम्।
बभञ्ज चर्यागृहगोपुराणि
प्राकारमुच्चं तमपातयच्च॥ **6.67.170** ॥

तच्चातिकायं हिमवत् प्रकाशं
रक्षस्तदा तोयनिधौ पपात।
ग्राहान् परान् मीनवरान् भुजङ्गान्
ममर्द भूमिं च तथा विवेश॥ **6.67.171** ॥

तस्मिन् हते ब्राह्मणदेवशत्रौ
महाबले संयति कुम्भकर्णे।
चचाल भूर्भूमिधराश्च सर्वे
हर्षाच्च देवास्तुमुलं प्रणेदुः॥ **6.67.172** ॥

ततस्तु देवर्षिमहर्षिपन्नगाः
सुराश्च भूतानि सुपर्णगुह्यकाः।

सयक्षगन्धर्वगणा नभोगताः
    प्रहर्षिता रामपराक्रमेण ॥ **6.67.173** ॥

ततस्तु ते तस्य वधेन भूरिणा
    मनस्विनो नैर्ऋतराजबान्धवाः।
विनेदुरुच्चैर्व्यथिता रघूत्तमं
    हरिं समीक्ष्यैव यथा मतङ्गजाः ॥ **6.67.174** ॥

स देवलोकस्य तमो निहत्य
    सूर्यो यथा राहुमुखाद् विमुक्तः।
तथा व्यभासीद्धरिसैन्यमध्ये
    निहत्य रामो युधि कुम्भकर्णम् ॥ **6.67.175** ॥

प्रहर्षमीयुर्बहवश्च वानराः
    प्रबुद्धपद्मप्रतिमैरिवाननैः।
अपूजयन् राघवमिष्टभागिनं
    हते रिपौ भीमबले नृपात्मजम् ॥ **6.67.176** ॥

स कुम्भकर्णं सुरसैन्यमर्दनं
    महत्सु युद्धेषु कदाचनाजितम्।
ननन्द हत्वा भरताग्रजो रणे
    महासुरं वृत्रमिवामराधिपः ॥ **6.67.177** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे सप्तषष्टितमः सर्गः ॥